धर्मं स सृष्टवान्। दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुम्। वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम्। अथर्वभूता इत्येते ख्यातास्त्वेव महर्षयः। त्रयोदश सुता येषां वंशा वै संप्रतिष्ठिताः"। हरिवं॰ २०४अ॰ जटाधरेण तु "वि॰ देवा दश स्मृता" इत्युक्तम्। गणदेवता शब्दे तन्मूलं वक्ष्यते। कल्पभेदादविरुद्धम्। तत्र प्रज्ञा निश्चयः अध्यवसायः यथाह "अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत" छा॰उ॰। "कथमुपासीत। स क्रतुं कुर्वीत क्रतुर्निश्चयोऽध्यवसायश्च एवमेव नान्यथेति अविचलः प्रत्ययस्तं क्रतुं कुर्वीतोपासीतेत्यनेन व्यवहितेन सम्बन्धः। किं पुनः क्रतुकरणेन कर्तव्यं प्रयोजनम्? कथं वा क्रतुः कर्त्तव्यः? क्रतुकरणं वाभिप्रेतार्थसाधनं कथम्? इत्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रन्थः। अथ खल्विति हेत्वर्थः। यस्मात् क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवः। यथाक्रतुर्यादृशः क्रतुरस्य सोऽयं यथाक्रतुर्यथाध्यवसायो यादृङ्निश्चयोऽस्मिँल्लोके जीवन्निह पुरुषो भवति। तथेतोऽस्माद्देहात् प्रेत्य मृत्वा भवति। क्रत्वनुरूपफलात्मको भवतीत्यर्थः एवं ह्येतच्छास्त्रतो दृष्टम्। "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरमित्यादि" यत एवं व्यवस्था शास्त्रदृष्टाऽतः स एवं जानन् क्रतुं कुर्वीत यादृशं क्रतुं वक्ष्यामस्तम्। यत एवं शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरूपं फलमतः स कर्त्तव्यः क्रतुः" भा॰। १०आषाढमासे चातुर्मास्यादियागारम्भकत्वात् तस्य तथात्वम् "वाजाय स्वाहा प्रसवाय स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाऽहर्पतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनंशिनाय स्वाहा, विनंशिन आन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा" यजु॰१८।२८ "वाजादीनि चैत्रादिमासानां नामानि तन्नाम गृहीत्वा होतव्यमित्यर्थः अन्नप्राचुर्य्याच्चैत्रोऽन्नरूपः, प्रसवाय अनुज्ञारूपाय जलक्रीडादौ अभ्यनुज्ञादानात् प्रसवो वैशाखः। अपिजाय अप्सु जायत इत्यपिजः सप्तम्या अलुक् जलक्रीड़ारतत्वादपिजो ज्यैष्ठः। क्रतवे यागरूपाय चातुर्मास्यादियागप्राचुर्य्यात् क्रतुराषाढ़ः" वेददी॰।

**क्रतुदोषनुद्** पु॰ क्रतूनामिन्द्रियाणां दोषं नुदति क्विप्। प्राणायामे शब्दचि॰ "दह्यन्ते ध्मायमानानां धातूनाञ्च यथा मलाः। प्राणायामैस्तथा दोषाः शाम्यन्तीन्द्रियगोचराः" मनूक्तेस्तस्येन्द्रियदोषनाशकत्वम् [नास्तिके च।

**क्रतुद्रुह्** पु॰ क्रतवे द्रुह्यति द्रुह—क्विप्। १असुरे जटाधरः

**क्रतुद्विष्** पु॰ क्रतवे द्वेष्टि द्विष—क्विप्। १असुरे त्रिका॰ २नास्तिके च।

**क्रतुध्वंसिन्** पु॰ क्रतुं दक्षयज्ञं ध्वंसयति ध्वन्स—णिच्—णिनि। शिवे अमरः। वीरभद्रद्वारा तद्यज्ञध्वंसनात्तस्य तथात्वम् तत्कथा काशी॰ ८९अ॰ यथा "महावीरोऽसि रे भद्र! मम सर्व्वगणेष्विह। वीरभद्राख्यया त्वं हि प्रथितिं परमां व्रज। कुरु मे सत्वरं कार्य्यं दक्षयज्ञं क्षयं नय। ये त्वां तत्रावमन्यन्ते तत्साहाय्यविधायिनः। ते त्वयाप्यवमन्तव्या व्रज पुत्त्र! शुभोदय!। इत्याज्ञां मूर्द्ध्नि चाधाय स ततः पारमेश्वरीम्। हरं प्रदक्षिणीकृत्य जगामानतिरंहसा। ततस्तदनुगान् शम्भुः स्वनिश्वाससमुद्भवान्। शतकोटिमितानुग्रान् गणानन्यानवासृजत्। ते गणा वीरभद्रं तं यान्तं केचित् पुरोगताः। केचित्तदनुगा याताः केचित्तत्पार्श्वतोऽययुः। अम्बरं तैः समाक्रान्तं तेजोविजितभास्करैः। शृङ्गाग्राणि गिरीणां च कैश्चिदुत्पाटितानि वै। आचूडमूलाः कैश्चिच्च विधृता वै शिलोच्चयाः। उत्पाट्य महतो वृक्षान् केचित् प्रागामसङ्गणाम्। कैश्चिदुत्पाटिता यूपाः केचित्कुण्डान्यपूरयन्। मण्डपं ध्वंसयामासुः केचित् क्रोधपरा गणाः। अकीखनन् यज्ञवेदीः केचिद्वै शूलपाणयः। अभक्षयन् हवींष्यन्ये पृषदाज्यं पपुः परे। दध्नः सुरत्नराशींश्च केचित् पर्व्वतसन्निभान्। केचिद्वै पायसाहाराः केचिद्वै क्षीरपायिनः। केचित् पक्वान्नपुष्टाङ्गा यज्ञपात्राण्यचूर्णयन्। अमोचयन् स्रुचां दण्डान् केचिद्दोर्दण्डशालिनः। व्यभञ्जन् शकटान् केचित् पशून् केचिदलोलुपन्। अग्निं निर्वापयामासुः केचिदत्यग्नितेजसः। स्वयं परिदधुस्त्वन्ये दुकूलानि मुदा युताः। जगृहुः केचन पुनारत्नानां पर्वतं क्षतम्। एकेन च भगो देवः पश्य स्वक्षो विलोचनः। पूष्णोदन्तावलीमन्यः पातयामास कोपनः। यज्ञः पलायितो दृष्टा केनचिन्मृगरूपधृक्। शिरोविरहितश्चक्रे तेन चक्रेण दूरतः"।

**क्रतुपुरुष** पु॰ क्रतुः पुरुष इव। पुरुषाकारे क्रतुमये यज्ञवराहे। तद्रूपवर्णनञ्च हरिवं॰ २२४अ॰ "वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः। अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः। अहोरात्रेक्षणधरो वेदाङ्ग